A staff, a stick 5. — [1]वैणवो [2]लगुडो [3]रम्भो [4]दण्डो [5]यष्टिश्च कथ्यते ।

Walking about, going, moving 5. — [1][2]गतिर्वीखा [3]विहारः [4]स्यात्परिसर्पः [5]परिक्रमः ॥७२६॥

Corner 5. — [1][2]अणिरश्रिस्तथा [3][4]कोटिरश्रः [5]कोणश्च कथ्यते ।

Foul, dirty 4. — [1]कश्मलं [2]मलिनं [3]म्लानं [4]मलीमसमुदाहृतम् ॥७२७॥

Wages, cost price 6. — [1][2]भृतिर्भृत्या च [3]कर्मण्या [a][4]वेता [5]मूल्यं च [6]वेतनम् ।

A line of a letter or writing 3. — [b][1][2]लिपिरालेख्यलेखा [c][3]स्याल्लिपिर्लेखाक्षरस्य च ॥७२८॥

Cutting, clipping 4. — [1]कल्पनं [2]कर्तनं प्रोक्तं [3]वर्धनं [4]छेदनं तथा ।

Reverse 4. — [1]व्यत्ययः [2]स्याद्विपर्यासो [3]वैपरीत्यं [4]विपर्ययः ॥७२९॥

Concealment of knowledge 4. — [1][2]अपह्नवोऽपलापः [3][4]स्यादपज्ञानमपात्ययः ।

Composition 5. — [1]श्रन्थनं [2]ग्रन्थनं [3]गुम्फः [4]सन्दर्भो [5]रचना स्मृता ॥७३०॥

Rubbing the body with fragrant unguents 2. — [1][d][2]उद्वर्तनमुत्सादनमाहुः
Ridiculing, derision 2. — [1][2]सोत्प्रासहसितमुपहसितम् ।

Confused 2. — [1][2]उत्पिञ्जलमाकुलकं
Following 3. — [1][2][3]स्यादनुपदमन्वगन्वक्षम् ॥७३१॥

White 7. — [1]गौरः [2]श्वेतः [3]सितः [4]शुभ्रो [5]वलक्षो [6][7]धवलोऽर्जुनः ।

Yellowish, white pale 5. — [1]हरिणः [2]पाण्डुरः [3][4]पाण्डुरवदातश्च [e][5]पाण्डरः ॥७३२॥

[1]अरुणः [2]शोणो [3]रक्तो [f][4]माञ्जिष्ठः [5]पाटलस्तथा [6]ताम्रः ।

Red 7. — [7]लोहित इत्येकार्थाः कविभिः [g]शब्दाः प्रयुज्यन्ते ॥७३३॥

Black 9. — [1]असितं [h][2]शिति [3]कृष्णं च [4]कालं [5]नीलं च [6]मेचकम् ।

[7]श्यामं तु [8]श्यामलं [9]रामं
Green 3. — [1]पालाशं [2]हरितं [3]हरित् ॥७३४॥

Tawny, brown 4. — [1]हरिः [2]कद्रुः [3]कडारश्च [4]पिङ्गलः परिकीर्तितः ।

Yellow 2. — [1]पीतं [2]हारिद्रमाख्यातं
Dark brown 2. — [1]श्यावं तु [2]कपिशं स्मृतम् ॥७३५॥

a वेचा b लिविराले c लिपिलेखाक्षरस्य d मुच्छादनमाहुः e पाण्डुरः, पाण्डुकः f मांजिष्टः g शब्दाः कविभिः h सिति, सित।